# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ६ | गुणा: – ७० |
| विषय: – स्वामिनारायणवेदान्त: ( J ) | (C.C.- 3.5.10. New ) | |
| दिनाङ्क: – १५/१०/२०१९ | सन्दर्भग्रन्थ: शिक्षापत्री–१२३–१७४ | समय: –३.०० त: ६.०० |

### प्रथमान्विति:

**प्रश्न: १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** (१०)

(१) संस्थाप्य विप्रं विद्वांसं पाठशालां विधाप्य च ।
प्रवर्तनीया सद्विद्या भुवि यत्सुकृतं महत् ॥
– इति श्लोकमर्थदीपिकाटीकानुगुणं व्याख्यात ।

(२) आचार्यपत्नीनां धर्मान् लिखत ।

(३) आर्यार्यै: कस्य विक्रय: न कार्य ? कथम् ?

**प्रश्न: २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** (१०)

(१) शिक्षापत्र्यां पदर्शितान् आचार्यधर्मान् वर्णयत ।

(२) स्वामिनारायणसम्प्रदाये आचार्यप्रतिष्ठापनविधिं यथाग्रन्थमुपपादयत ।

### द्वितीयान्विति:

**प्रश्न: ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** (१०)

(१) यावज्जीवं च शुश्रूषा कार्या मातु: पितुर्गुरो: ।
रोगार्तस्य मनुष्यस्य यथाशक्ति च मामकै: ॥ इति श्लोकं सान्वयं व्याख्यात ।

(२) गृहस्थाश्रमिभि: द्रव्यसङ्ग्रहविक्रयौ केन प्रकारेण कर्तव्यौ ?

(३) दशांशो विंशांशश्च भाग: देवार्थं कथं विधेयम् ?

**प्रश्न: ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेय: ।** (१०)

(१) यथाग्रन्थं गृहस्थाश्रमिणां धर्मान् उपपादयत ।

(२) शिक्षापत्र्यनुसारं राजधर्मान् प्रतिपादयत ।

### तृतीयान्विति:

**प्रश्न: ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** (१०)

(१) सधवाभि: नारिभि: स्वपति: कथं सेव्य: ?

(२) विधवानां कृते स्पर्शास्पर्शविवेकं संदर्शयत ।

(३) सधवाविधवयो: सामान्यधर्मान् लिखत ।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** (१०)

(१) शिक्षापत्र्यनुगुणं साध्वीनां धर्मान् प्रतिपादयत।

(२) विधवास्त्रीणां धर्मान् यथाग्रन्थमुपपादयत।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः।** (१०)

(१) मुमुक्षुभिः कस्मात् दीक्षा ग्रहीतव्या ?

(२) धर्मरक्षणहेतवे भगवता श्रीस्वामिनारायणेन कयोः प्रतिष्ठा कृता ?

(३) गणपतिपूजनं कदा कार्यम् ?

(४) हनुमत्पूजनं कदा कार्यम् ?

(५) शिक्षापत्री कुत्र लिखिता ?

(६) कस्मात् ऋणं न ग्राह्यम् ?

(७) कुत्र परान्नं न ग्राह्यम् ?

(८) नृपैः प्रजापालनं कथं कर्तव्यम् ?

(९) शिक्षापत्र्याः टीकायाः नाम किम् ?

(१०) सधवाभिः कस्य प्रसङ्गो न कर्तव्यः ?

(११) सधवाभिः नारीभिः स्वपत्यौ देशान्तरं गते किं त्याज्यम् ?

(१२) विधवाभिः पतिधिया कः सेवनीयः ?

(१३) विधवाभिः स्त्रीभिः के न स्पृश्याः ?

(१४) केषां स्पर्शे विधवानां कृते दोषः नास्ति ?

(१५) रजस्वला नारी कियत् न स्पृश्या ?

--००--